# Chapter 3: Unity Consciousness

वसिष्ठ उवाच
दिनानुदिनमित्येषा स्वात्मारामतया तया
नित्यमन्तर्मुखतया बभूव प्रकृतिस्थिता १
नीरागा निरुपासङ्गा निर्द्वन्द्वा निःसमीहिता
न जहाति न चादत्ते प्रकृताचारचारिणी २
परितीर्णभवाम्भोधिः शान्तसंदेहजालिका
परमात्ममहालाभपरिपूर्णान्तरात्मना ३
विश्रान्ता सुचिरं श्रान्ता घनलब्धपदान्तरे
सर्वोपमातीततया जगामाव्यपदेश्यताम् ४
इति सा भामिनी तस्य चूडाला वरवर्णिनी
स्वल्पेनैव हि कालेन ययौ विदितवेद्यताम् ५
यथायमागतः कश्चिन्नागतः स्पन्दविभ्रमः
तथा विलीयते सर्वं तत्त्वज्ञानवति स्वयम् ६
अदृष्टसकले शान्ते पदे विश्रान्तिमेत्य सा
रराज शरदच्छाभ्रमालेव गतसंभ्रमा ७
अनाकुला समालोकमसंबन्धात्मनात्मनि
जरद्गवीव शैलाग्रं सतृणं प्राप्य संस्थिता ८
स्वविवेकघनाभ्यासवशादात्मोदयेन सा
शुशुभे शोभना पुष्पलतेवामिनवोद्गता ९
अथ तामनवद्याङ्गीं कदाचित्स शिखिध्वजः
अपूर्वशोभामालोक्य स्मयमान उवाच ह १०
भूयो यौवनयुक्तेव मण्डितेव पुनःपुनः
अधिकं राजसे तन्वि जगद्राजवती यथा ११

प्रपीतामृतसारेव लब्धा लभ्यपदेव च
आनन्दापूरपूर्णेव राजसे नितरां प्रिये १२
उपशान्तं च कान्तं च दधाना सुन्दरं वपुः
अभिभूयेन्दुमायासि श्रियं कामपि कामिनि १३
अभोगकृपणं शान्तमूर्जितं समतां गतम्
गम्भीरं च प्रशान्तं च चेतः पश्यामि ते प्रिये १४
तृणीकृत्य त्रिभुवनं पीताखिलजगद्रसम्
अनन्तोड्डामरं सौम्यं मनः पश्यामि ते प्रिये १५
न केनचिन्महाभागे विभवानन्दवस्तुना
चेतस्तव तुलामेति मरुक्षीराब्धिसुन्दरम् १६
तैरेव बालकदलीमृणालाङ्कुरकोमलैः
अङ्गैः स्थितिमनुप्राप्तैर्वृद्धिं यातेव लक्ष्यसे १७
तथा तेनैव तेनैव संनिवेशेन संस्थिता
अन्यतामुपयातासि लतेव ऋतुपर्यते १८
किं त्वया पीतममृतं प्राप्तं साम्राज्यमेव वा
अमृत्युमेव संप्राप्ता प्रयोगायोगयुक्तितः १९
राज्याच्चिन्तामणेर्वापि त्रैलोक्याद्वा त्वयाधिकम्
अप्राप्तं किमनुप्राप्तं नीलोत्पलविलोचने २०
चूडालोवाच
नाकिंचित्किंचिदाकारमिदं त्यक्त्वाहमागता
न किंचित्किंचिदाकारं तेनास्मि श्रीमती स्थिता
२१
इदं सर्वं परित्यज्य सर्वमन्यन्मयाश्रितम्

यत्तत्सत्यमसत्यं च तेनास्मि श्रीमती स्थिता २२
यत्किंचिद्यन्न किंचिच्च तज्जानामि यथास्थितम्
यथोदयं यथानाशं तेनास्मि श्रीमती स्थिता २३
भोगैरभुक्तैस्तुष्यामि भुक्तैरिव सुदूरगैः
न हृष्यामि न कुप्यामि तेनास्मि श्रीमती स्थिता
२४
एकैवाकाशसंकाशे केवले हृदये रमे
न रमे राजलीलासु तेनास्मि श्रीमती स्थिता २५
आत्मन्येव हि तिष्ठामि ह्यासनोद्यानसद्मसु
न भोगेषु न लज्जासु तेनाहं श्रीमती स्थिता २६
जगतां प्रभुरेवास्मि न किंचिन्मात्ररूपिणी
इत्यात्मन्येव तुष्यामि तेनाहं श्रीमती स्थिता २७
इदं चाहमिदं नाहं सत्या चाहं न चाप्यहम्
सर्वमस्मि न किंचिच्च तेनाहं श्रीमती स्थिता २८
न सुखं प्रार्थये नार्थं नानर्थं नेतरां स्थितिम्
यथाप्राप्तेन हृष्यामि तेनाहं श्रीमती स्थिता २९
तनुविद्वेषराजाभिः प्रज्ञाभिः शास्त्रदृष्टिभिः
रमे सह वयस्याभिस्तेनाहं श्रीमती स्थिता ३०
पश्यामि यन्नयनरश्मिभिरिन्द्रियैर्वा
चित्तेन चेह हि तदङ्ग न किंचिदेव
पश्यामि तद्विरहितं तु न किंचिदन्तः
पश्यामि सम्यगिति नाथ चिरोदयास्मि ३१
इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये

मोक्षोपायेषु निर्वाणप्रकरणे चूडालात्मलाभो नामैकोनाशीतितमः सर्गः ७९